भक्तामर-स्तोत्र
Bhaktāmara-Stōtra

आचार्य श्री मानतुंग स्वामी
Acharya śrī Mānatuṅgā swami

परिचय : यह सुप्रसिद्ध स्तोत्र है। क्रुद्ध नृपति द्वारा आचार्य मानतुंग को बलपूर्वक पकड़वा कर 48 तालों के अंदर बंद करवा दिया गया था। उस समय धर्म की रक्षा और प्रभावना हेतु आचार्यश्री ने भगवान् आदिनाथ की इस भक्ति-स्तुति की रचना की थी, जिस से 48 ताले स्वयं टूट गये थे और राजा ने क्षमा माँगकर उनके प्रति बड़ी भक्ति प्रदर्शित की थी। 'भक्तामर-स्तोत्र' का पाठ समस्त विघ्न-बाधाओं का नाशक और सब प्रकार मंगलकारक माना जाता है। इसका प्रत्येक श्लोक मंत्र मानकर उसकी आराधना भी की जाती है |

Paricaya: Yaha suprasid'dha stōtra hai. Krud'dha nr̥pati dvārā ācārya mānatuṅga kō balapūrvaka pakaṛavā kara 48 tālōṁ kē andara banda karavā diyā gayā thā. Usa samaya dharma kī rakṣā aura prabhāvanā hētu ācāryaśrī nē bhagavān ādinātha kī isa stuti kī racanā kī thī, jisasē 48 tālē svayaṁ ṭūṭa gayē thē aura rājā nē kṣamā mām̐gakara unakē prati baṛī bhakti pradarśita kī thī. 'Bhaktāmara-stōtra' kā pāṭha samasta vighna-bādhā'ōṁ kā nāśaka aura saba prakāra maṅgalakāraka mānā jātā hai. Isakā pratyēka ślōka mantra mānakara usakī ārādhanā bhī kī jātī hai |

(अधिक जानकारी के लिए हमारे यहाँ से प्रकाशित 'भक्तामर-स्तोत्रम्' देखें |)

(Adhika jānakārī kē li'ē hamārē yahām̐ sē prakāśita 'bhaktāmara-stōtram' dēkhēṁ |)

(वसंत-तिलका छंद)
(Vasanta-tilakā chhanda)

भक्तामर-प्रणत-मौलि-मणि-प्रभाणा-
मुद्योतकं दलित-पाप-तमो-वितानम् |
सम्यक् प्रणम्य जिन-पाद-युगं युगादा-
वालम्बनं भव-जले पततां जनानाम् ||१||

Bhaktāmara-praṇata-mauli-maṇi-prabhāṇā
Mudyōtakaṁ dalita-pāpa-tamō-vitānam |
Samyak praṇamya jina-pāda-yugaṁ yugādā-
vālambanaṁ bhava-jalē patatāṁ janānām ||1||

All copyrights reserved © 2Alotus

य: संस्तुत: सकल-वाङ्मय-तत्त्व-बोधा-
दुद्भूत-बुद्धि-पटुभि: सुर-लोकनाथै: |
स्तोत्रैर्जगत् - त्रितय - चित्त - हरैरुदारै:,
स्तोष्ये किलाहमपि तं प्रथमं जिनेन्द्रम् ||२||
Ya: Sanstuta: Sakala-vāngmaya-tattva-bōdhā-
dudbhūta-bud'dhi-paṭubhi: Sura-lōkanāthai: |
Stōtrairjagat - tritaya - citta - harairudārai:,
Stōṣyē kilāhamapi taṁ prathamaṁ jinēndram ||2||

बुद्धया विनापि विबुधार्चित-पाद-पीठ
स्तोतुं समुद्यत-मतिर्विगत-त्रपोऽहम् |
बालं विहाय जल-संस्थितमिन्दु-बिम्ब-
मन्य: क इच्छति जन: सहसा ग्रहीतुम् ||३||
Bud'dhayā vināpi vibudhārcita-pāda-pīṭha
Stōtuṁ samudyata-matirvigata-trapōham |
Bālaṁ vihāya jala-sansthitamindu-bimba-
Man'ya: Ka icchati jana: Sahasā grahītum ||3||

वक्तुं गुणान्गुण-समुद्र शशांक-कान्तान्,
कस्ते क्षम: सुर-गुरु-प्रतिमोऽपि बुद्ध्या |
कल्पान्त-काल-पवनोद्धत-नक्र-चक्रम्,
को वा तरीतुमलमम्बुनिधिं भुजाभ्याम् ||4||
Vaktuṁ guṇān'guṇa-samudra śaśāṅka-kāntān,
Kastē kṣama: Sura-guru-pratimōpi bud'dhyā |
Kalpānta-kāla-pavanōd'dhata-nakra-cakram,
Kō vā tarītumalamambunidhiṁ bhujābhyām ||4||

All copyrights reserved © 2Alotus

सोऽहं तथापि तव भक्ति-वशान्मुनीश!
कर्तुं स्तवं विगत-शक्तिरपि प्रवृत्त:|
प्रीत्यात्म-वीर्यमविचार्य मृगी मृगेन्द्रम्,
नाभ्येति किं निज-शिशो: परिपालनार्थम् ||५||

Sōhaṁ tathāpi tava bhakti-vaśānmunīśa!
Kartuṁ stavaṁ vigata-śaktirapi pravr̥tta: |
Prītyātma-vīryamavicārya mr̥gī mr̥gēndram,
Nābhyēti kiṁ nija-śiśō: Paripālanārtham ||5||

अल्प-श्रुतं श्रुतवतां परिहास-धाम!
त्वद्भक्तिरेव मुखरीकुरुते बलान्माम् |
यत्कोकिल: किल मधौ मधुरं विरौति,
तच्चाम्र-चारु-कलिका-निकरैक-हेतु: ||६||

Alpa-śrutaṁ śrutavatāṁ parihāsa-dhāma!
Tvadbhaktirēva mukharīkurutē balānmām |
Yatkōkila: Kila madhau madhuraṁ virauti,
Taccāmra-cāru-kalikā-nikaraika-hētu: ||6||

त्वत्संस्तवेन भव-सन्तति-सन्निबद्धम्,
पापं क्षणात्क्षयमुपैति शरीरभाजाम् |
आक्रान्त-लोकमलि-नीलमशेषमाशु,
सूर्यांशु-भिन्नमिव शार्वरमन्धकारम् ||७||

Tvatsanstavēna bhava-santati -sannibad’dham,
Pāpaṁ kṣaṇātkṣayamupaiti arīrabhājām |
Ākrānta-lōkamali-nīlamaśēṣamāśu,
Sūryānśu-bhitnnamiva śārvaramandhakāram ||7||

मत्त्वेति नाथ! तव संस्तवनं मयेद-
मारभ्यते तनु-धियापि तव प्रभावात् |
चेतो हरिष्यति सतां नलिनी-दलेषु,
मुक्ता-फलद्युतिमुपैति ननूद-बिन्दु: ||८||

Mattvēti nātha! Tava sanstavanaṁ mayēda-
Mārabhyatē tanu-dhiyāpi tava prabhāvāt |
Cētō hariṣyati satāṁ nalinī-dalēṣu,
Muktā-phaladyutimupaiti nanūda-bindu: ||8||

All copyrights reserved © 2Alotus

आस्तां तव स्तवनमस्त-समस्त-दोषम्,
त्वत्संकथाऽपि जगतां दुरितानि हन्ति ।
दूरे सहस्रकिरण: कुरुते प्रभैव,
पद्माकरेषु जलजानि विकासभाञ्जि ।।९।।

Āstāṁ tava stavanamasta-samasta-dōṣam,
Tvatsaṅkathāþi jagatāṁ duritāni hanti |
Dūrē sahasrakiraṇa: Kurutē prabhaiva,
Padmākarēṣu jalajāni vikāsabhāñji ||9||

नात्यद्भुतं भुवन-भूषण भूत-नाथ!
भूतैर्गुणैर्भुवि भवन्तमभिष्टुवन्त: ।
तुल्या भवन्ति भवतो ननु तेन किं वा,
भूत्याश्रितं य इह नात्मसमं करोति ||१०||

Nātyadbhutaṁ bhuvana-bhūṣaṇa bhūta-nātha!
Bhūtairguṇairbhuvi bhavantamabhiṣṭuvanta: |
Tulyā bhavanti bhavatō nanu tēna kiṁ vā,
Bhūtyāśritaṁ ya iha nātmasamaṁ karōti ||10||

दृष्ट्वा भवन्तमनिमेष-विलोकनीयम्,
नान्यत्र तोषमुपयाति जनस्य चक्षु: ।
पीत्वा पय: शशिकर-द्युति-दुग्ध-सिन्धो:,
क्षारं जलं जल-निधे रसितुं क: इच्छेत् ||११||

Dṛṣṭvā bhavantamanimēṣa-vilōkanīyam,
Nān'yatra tōṣamupayāti janasya cakṣu: |
Pītvā paya: Śaśikara-dyuti-dugdha-sindhō:,
Kṣāraṁ jalaṁ jala-nidhē rasituṁ ka: Icchēt ||11||

यै: शान्त-राग-रुचिभि: परमाणुभिस्त्वम्,
निर्मापितस्त्रिभुवनैक - ललाम – भूत !
तावन्त एव खलु तेऽप्यणव: पृथिव्याम्,
यत्ते समानमपरं न हि रूपमस्ति ||१२||

Yai: Śānta-rāga-rucibhi: Paramāṇubhistvam,
Nirmāpitastribhuvanaika - lalāma – bhūta!
Tāvanta ēva khalu tēþyaṇava: Pṛthivyām,
Yattē samānamaparaṁ na hi rūpamasti ||12||

All copyrights reserved © 2Alotus

वक्त्रं क्व ते सुर-नरोरग-नेत्र-हारि,
नि:शेष-निर्जित-जगत्त्रितयोपमानम् |
बिम्बं कलंक-मलिनं क्व निशाकरस्य,
यद्वासरे भवति पांडु-पलाश-कल्पम् ||१३||
Vaktraṁ kva tē sura-narōraga-nētra-hāri,
Ni:Śēṣa-nirjita-jagattritayōpamānam |
Bimbaṁ kalaṅka-malinaṁ kva niśākarasya,
Yadvāsarē bhavati pāṇḍu-palāśa-kalpam ||13||

सम्पूर्ण-मंडल-शशांक-कला-कलाप-
शुभ्रा गुणास्त्रिभुवनं तव लंघयन्ति |
ये संश्रितास्त्रिजगदीश्वर-नाथमेकम्,
कस्तान्निवारयति संचरतो यथेष्टम् ||१४||
Sampūrṇa-maṇḍala-śaśāṅka-kalā-kalāpa-
Subhrā guṇāstribhuvanaṁ tava laṅghayanti |
Yē sanśritāstrijagadīśvara-nāthamēkam,
Kastānnivārayati sañcaratō yathēṣṭam ||14||

चित्रं किमत्र यदि ते त्रिदशांगनाभि-
र्नीतं मनागपि मनो न विकार-मार्गम् |
कल्पान्त-काल-मरुता चलिताचलेन,
किं मन्दराद्रि-शिखरं चलितं कदाचित् ||१५||
Citraṁ kimatra yadi tē tridaśāṅganābhir-
Nītaṁ manāgapi manō na vikāra-mārgam |
Kalpānta-kāla-marutā calitācalēna,
Kiṁ mandarādri-śikharaṁ calitaṁ kadācit ||15||

निर्धूम - वर्तिरपवर्जित - तैल - पूर:,
कृत्स्नं जगत्त्रयमिदं प्रकटीकरोषि |
गम्यो न जातु मरुतां चलिताचलानाम्,
दीपोऽपरस्त्वमसि नाथ जगत्प्रकाश: ||१६||
Nirdhūma - vartirapavarjita - taila - pūra:,
Kṛtsnaṁ jagattrayamidaṁ prakaṭīkarōṣi |
Gamyō na jātu marutāṁ calitācalānām,
Dīpōþarastvamasi nātha jagatprakāśa: ||16||

All copyrights reserved © 2Alotus

नास्तं कदाचिदुपयासि न राहु-गम्य:,
स्पष्टीकरोषि सहसा युगपज्जगन्ति |
नाम्भोधरोदर-निरुद्ध-महा-प्रभाव:,
सूर्यातिशायि-महिमासि मुनीन्द्र! लोके ||१७||

Nāstaṁ kadācidupayāsi na rāhu-gamya:,
Spaṣṭīkarōṣi sahasā yugapajjaganti |
Nāmbhōdharōdara-nirud'dha-mahāprabhāva:,
Sūryātiśāyi-mahimāsi munīndra! Lōkē ||17||

नित्योदयं दलित-मोह-महान्धकारम्,
गम्यं न राहु-वदनस्य न वारिदानाम् |
विभ्राजते तव मुखाब्जमनल्पकान्ति,
विद्योतयज्जगदपूर्व-शशान्क-बिम्बम् ||१८||

Nityōdayaṁ dalita-mōha-mahāndhakāram,
Gamyaṁ na rāhu-vadanasya na vāridānām |
Vibhrājatē tava mukhābjamanalpakānti,
Vidyōtayajjagadapūrva-śaśānk-bimbam ||18||

किं शर्वरीषु शशिनाऽह्नि विवस्वता वा,
युष्मन्मुखेन्दु-दलितेषु तम:सु नाथ |
निष्पन्न-शालि-वन-शालिनि जीव-लोके,
कार्यं कियज्जलधरैर्जल-भार-नम्रै: ||१९||

Kiṁ śarvarīṣu śaśinā'ahnī vivasvatā vā,
Yuṣmanmukhēndu-dalitēṣu tama:Su nātha |
Niṣpatra-śāli-vana-śālini jīva-lōkē,
Kāryaṁ kiyajjaladharairjala-bhāra-namrai: ||19||

ज्ञानं यथा त्वयि विभाति कृतावकाशम्,
नैवं तथा हरिहरादिषु नायकेषु |
तेज: स्फुरन्मणिषु याति यथा महत्त्वम्,
नैवं तु काच-शकले किरणाकुलेऽपि ||२०||

Jñānaṁ yathā tvayi vibhāti kr̥tāvakāśam,
Naivaṁ tathā hariharādiṣu nāyakēṣu |
Tēja: Sphuranmaṇiṣu yāti yathā mahattvam,
Naivaṁ tu kāca-śakalē kiraṇākulēpi ||20||

All copyrights reserved © 2Alotus

मन्ये वरं हरिहरादय एव दृष्टा,
दृष्टेषु येषु हृदयं त्वयि तोषमेति |
किं वीक्षितेन भवता भुवि येन नान्य:,
कश्चिन्मनो हरति नाथ! भवान्तरेऽपि ||२१||

Man'yē varaṁ hariharādaya ēva dr̥ṣṭā,
Dr̥ṣṭēṣu yēṣu hr̥dayaṁ tvayi tōṣamēti |
Kiṁ vīkṣitēna bhavatā bhuvi yēna nān'ya:,
Kaścinmanō harati nātha! Bhavāntarēþi ||21||

स्त्रीणां शतानि शतशो जनयन्ति पुत्रान्,
नान्या सुतं त्वदुपमं जननी प्रसूता |
सर्वा दिशो दधति भानि सहस्र-रश्मिम्,
प्राच्येव दिग्जनयति स्फुरदंशुजालम् ||२२||

Strīṇāṁ śatāni śataśō janayanti putrān,
Nān'yā sutaṁ tvadupamaṁ jananī prasūtā |
Sarvā diśō dadhati bhāni sahasra-raśmim,
Prācyēva digjanayati sphuradanśujālam ||22||

त्वामामनन्ति मुनय: परमं पुमांस-
मादित्य-वर्णममलं तमस: पुरस्तात् |
त्वामेव सम्यगुपलभ्य जयन्ति मृत्युम्,
नान्य: शिव: शिवपदस्य मुनीन्द्र! पन्था: ||२३||

Tvāmāmananti munaya: Paramaṁ pumānsa-
Māditya-varṇamamalaṁ tamasa: Purastāt |
Tvāmēva samyagupalabhya jayanti mr̥tyum,
Nān'ya: Śiva: Śivapadasya munīndra! Panthā: ||23||

त्वामव्ययं विभुमचिन्त्यमसंख्यमाद्यम्,
ब्रह्माण-मीश्वर-मनन्त-मनंगकेतुम् |
योगीश्वरं विदितयोगमनेकमेकम्,
ज्ञानस्वरूपममलं प्रवदन्ति सन्त: ||२४||

Tvāmavyayaṁ vibhumacintyamasaṅkhyamādyam,
Brahmāṇa-mīśvara-mananta-manangakētum |
Yōgīśvaraṁ viditayōgamanēkamēkam,
Jñānasvarūpamamalaṁ pravadanti santa: ||24||

All copyrights reserved © 2Alotus

बुद्धस्त्वमेव विबुधार्चित-बुद्धि-बोधात्,
त्वं शंकरोऽसि भुवन-त्रय-शंकरत्वात् |
धातासि धीर! शिवमार्ग-विधेर्विधानात्,
व्यक्तं त्वमेव भगवन्! पुरुषोत्तमोऽसि ||२५||
Bud'dhastvamēva vibudhārcita-bud'dhi-bōdhāt,
Tvaṁ śankarōāsi bhuvana-traya-śankaratvāt |
Dhātāsi dhīra! Śivamārga-vidhērvidhānāt,
Vyaktaṁ tvamēva bhagavan! Puruṣōttamōāsi ||25||

तुभ्यं नमस्त्रिभुवनार्ति-हराय नाथ!
तुभ्यं नम: क्षिति-तलामल-भूषणाय |
तुभ्यं नमस्त्रिजगत: परमेश्वराय,
तुभ्यं नमो जिन! भवोदधि-शोषणाय ||२६||
Tubhyaṁ namastribhuvanārti-harāya nātha!
Tubhyaṁ nama: Kṣiti-talāmala-bhūṣaṇāya |
Tubhyaṁ namastrijagata: Paramēśvarāya,
Tubhyaṁ namō jina! Bhavōdadhi-śōṣaṇāya ||26||

को विस्मयोऽत्र यदि नाम गुणैरशेषै-
स्त्वं संश्रितो निरवकाशतया मुनीश !
दोषैरुपात्त-विविधाश्रय - जात – गर्वैः
स्वप्नान्तरेऽपि न कदाचिदपीक्षितोऽसि ||२७||
Kō vismayōātra yadi nāma guṇairaśēṣai-
Stvaṁ sanśritō niravakāśatayā munīśa!
Dōṣairupātta-vividhāśraya - jāta – garvaiḥ
Svapnāntarēapi na kadācidapīkṣitōasi ||27||

उच्चैरशोक - तरु - संश्रितमुन्मयूख-
माभाति रूपममलं भवतो नितान्तम् |
स्पष्टोल्लसत्किरणमस्त-तमो-वितानम्,
बिम्बं रवेरिव पयोधर-पार्श्ववर्ति ||२८||
Uccairaśōka - taru - sanśritamunmayūkha-
Mābhāti rūpamamalaṁ bhavatō nitāntam |
Spaṣṭōllasatkiraṇamasta-tamō-vitānam,
Bimbaṁ ravēriva payōdhara-pāśrvavarti ||28||

All copyrights reserved © 2Alotus

सिंहासने मणि-मयूख-शिखा-विचित्रे,
विभ्राजते तव वपु: कनकावदातम् |
बिम्बं वियद्विलसदंशुलता-वितानम्,
तुंगोदयाद्रि-शिरसीव सहस्र-रश्मे: ||२९||
Simhāsanē maṇi-mayūkha-śikhā-vicitrē,
Vibhrājatē tava vapu: Kanakāvadātam |
Bimbaṁ viyadvilasadanśulatā-vitānam,
Tungōdayādri-śirasīva sahasra-raśmē: ||29||

कुन्दावदात-चल-चामर-चारु-शोभम्,
विभ्राजते तव वपु: कलधौत-कान्तम् |
उद्यच्छशांक शुचि-निर्झर-वारि-धार-
मुच्चैस्तटं सुरगिरेरिव शातकौम्भम् ||३०||
Kundāvadāta-cala-cāmara-cāru-śōbham,
Vibhrājatē tava vapu: Kaladhauta-kāntam |
Udyacchaśānk-śuci-nirjhara-vāri-dhāra-
Muccaistaṭaṁ suragirēriva śātakaumbham ||30||

छत्र-त्रयं तव विभाति शशांककान्त-
मुच्चै: स्थितं स्थगित-भानु-कर-प्रतापम् |
मुक्ता-फल-प्रकर-जाल-विवृद्ध-शोभम्,
प्रख्यापयत्त्रिजगत: परमेश्वरत्वम् ||३१||
Chatra-trayaṁ tava vibhāti śaśāghaï-kānta-
Muccai: Sthitaṁ sthagita-bhānu-kara-pratāpam |
Muktā-phala-prakara-jāla-vivṛd'dha-śōbham,
Prakhyāpayattrijagata: Paramēśvaratvam ||31||

गम्भीर-तार-रव-पूरित-दिग्विभाग-
स्त्रैलोक्य-लोक-शुभ-संगमभूतिदक्ष: |
सद्धर्मराज-जय-घोषण-घोषक: सन्,
खे दुन्दुभिर्ध्वनति ते यशस: प्रवादी ||३२||
Gambhīra-tāra-rava-pūrita-digvibhāga-
Strailōkya-lōka-śubha-sangamabhūtidakṣa: |
Sad'dharmarāja-jaya-ghōṣaṇa-ghōṣaka: San,
Khē dundubhirdhvanati tē yaśasa: Pravādī ||32||

All copyrights reserved © 2Alotus

मन्दार - सुन्दर - नमेरु - सुपारिजात-
सन्तानकादि-कुसुमोत्कर-वृष्टिरुद्धा |
गन्धोद-बिन्दु-शुभ-मन्द-मरुत्प्रयाता,
दिव्या दिव: पतति ते वचसां ततिर्वा ||३३||

Mandāra - sundara - namēru - supārijāta-
Santānakādi-kusumōtkara-vr̥ṣṭirud'dhā |
Gandhōda-bindu-śubha-manda-marutprayātā,
Divyā diva: Patati tē vacasāṁ tatirvā ||33||

शुम्भत्प्रभा-वलय-भूरि-विभाविभोस्ते,
लोकत्रये द्युतिमतां द्युतिमाक्षिपन्ति |
प्रोद्यद्दिवाकर-निरन्तर-भूरि - संख्या,
दीप्त्या जयत्यपि निशामपि सोम-सौम्याम् ||३४||

Śumbhatprabhā - valaya-bhūri-vibhāvibhōstē,
Lōkatrayē dyutimatāṁ dyutimākṣipanti |
Prōdyaddivākara-nirantara-bhūri -saṅkhyā,
Dīptyā jayatyapi niśāmapi sōma-saumyām ||34||

स्वर्गापवर्ग-गम-मार्ग-विमार्गणेष्ट:,
सद्धर्म-तत्त्व-कथनैक-पटुस्त्रिलोक्या: |
दिव्य-ध्वनिर्भवति ते विशदार्थ-सर्व-
भाषा-स्वभाव-परिणाम-गुणै: प्रयोज्य: ||३५||

Svargāpavarga-gama-mārga-vimārgaṇēṣṭa:,
Sad'dharma-tattva-kathanaika-paṭustrilōkyā: |
Divya-dhvanirbhavati tē viśadārtha-sarva-
Bhāṣā-svabhāva-pariṇāma-guṇai: Prayōjya: ||35||

उन्निद्र-हेम-नव-पंकज-पुञ्ज-कान्ती,
पर्युल्लसन्नख-मयूख-शिखाभिरामौ |
पादौ पदानि तव यत्र जिनेन्द्र! धत्त:,
पद्मानि तत्र विबुधा: परिकल्पयन्ति ||३६||

Unnidra-hēma-nava-paṅkaja-puñja-kāntī,
paryullasannakha-mayūkha-śikhābhirāmau |
Pādau padāni tava yatra jinēndra! Dhatta:,
Padmāni tatra vibudhā: Parikalpayanti ||36||

All copyrights reserved © 2Alotus

इत्थं यथा तव विभूतिरभूज्जिनेन्द्र!
धर्मोपदेशन - विधौ न तथा परस्य |
यादृक्प्रभा दिनकृत: प्रहतान्धकारा,
तादृक्कुतो ग्रह-गणस्य विकाशिनोऽपि ||३७||
It'thaṁ yathā tava vibhūtirabhūjjinēndra!
Dharmōpadēśana - vidhau na tathā parasya |
Yādr̥kprabhā dinakr̥ta: Prahatāndhakārā,
Tādr̥kkutō graha-gaṇasya vikāśinōpi ||37||

श्च्योतन्मदाविल-विलोल-कपोल-मूल-
मत्त-भ्रमद्-भ्रमर-नाद-विवृद्ध-कोपम् |
ऐरावताभमिभ मुद्धतमापतन्तम्,
दृष्ट्वा भयं भवति नो भवदाश्रितानाम् ||३८||
Ścyōtanmadāvila-vilōla-kapōla-mūla-
Matta-bhramad-bhramara-nāda-vivr̥d'dha-kōpam |
Airāvatābhamibha mud'dhatamāpatantam,
Dr̥ṣṭvā bhayaṁ bhavati nō bhavadāśritānām ||38||

भिन्नेभ-कुम्भ-गलदुज्ज्वल-शोणिताक्त-
मुक्ता-फल-प्रकर-भूषित-भूमि-भाग: |
बद्ध-क्रम: क्रम-गतं हरिणाधिपोऽपि,
नाक्रामति क्रम-युगाचल-संश्रितं ते ||३९||
Bhinnēbha-kumbha-galadujjvala-śōṇitākta-
Muktā-phala-prakara-bhūṣita-bhūmi-bhāga: |
Bad'dha-krama: Krama-gataṁ hariṇādhipōpi,
Nākrāmati krama-yugācala-sanśritaṁ tē ||39||

कल्पान्त-काल-पवनोद्धत-वह्नि-कल्पम्,
दावानलं ज्वलितमुज्ज्वलमुत्स्फुलिंगम् |
विश्वं जिघत्सुमिव सम्मुखमापतन्तम्,
त्वन्नाम-कीर्तन-जलं शमयत्यशेषम् ||४०||
Kalpānta-kāla-pavanōd'dhata-vahni-kalpam,
Dāvānalaṁ jvalitamujjvalamutsphulingam |
Viśvaṁ jighatsumiva sammukhamāpatantam,
Tvannāma-kīrtana-jalaṁ śamayatyaśēṣam ||40||

All copyrights reserved © 2Alotus

रक्तेक्षणं समद-कोकिल-कण्ठ-नीलम्,
क्रोधोद्धतं फणिनमुत्फणमापतन्तम् |
आक्रामति क्रम-युगेण निरस्त-शंक-
स्त्वन्नाम-नागदमनी हृदि यस्य पुंस: ||४१||
Raktēkṣaṇaṁ samada-kōkila-kaṇṭha-nīlam,
Krōdhōd'dhataṁ phaṇinamutphaṇamāpatantam |
Ākrāmati krama-yugēṇa nirasta-śanka-
Stvannāma-nāgadamanī hr̥di yasya punsa: ||41||

वल्गत्तुरंगगज-गर्जित-भीमनाद-
माजौ बलं बलवतामपि भूपतीनाम् |
उद्यद्दिवाकर-मयूख-शिखापविद्धम्,
त्वत्कीर्तनात्तम इवाशु भिदामुपैति ||४२||\
Valgatturang-gaja-garjita-bhīmanāda-
Mājau balaṁ balavatāmapi bhūpatīnām |
Udyaddivākara-mayūkha-śikhāpavid'dham,
Tvatkīrtanāttama ivāśu bhidāmupaiti ||42||

कुन्ताग्र-भिन्न-गज-शोणित-वारिवाह-
वेगावतार - तरणातुर - योध–भीमे |
युद्धे जयं विजित-दुर्जय-जेय-पक्षा-
स्त्वत्पाद-पंकज-वनाश्रयिणो लभन्ते ||४३||
Kuntāgra-bhinna-gaja-śōṇita-vārivāha-
Vēgāvatāra - taraṇātura - yōdha–bhīmē |
Yud'dhē jayaṁ vijita-durjaya-jēya-pakṣā-
Stvatpāda-paṅkaja-vanāśrayiṇō labhantē ||43||

अम्भोनिधौक्षुभित-भीषण-नक्र-चक्र-
पाठीन-पीठ-भय-दोल्वण – वाड़वाग्नौ |
रंगत्तरंग-शिखर-स्थित-यान-पात्रास्-
त्रासं विहाय भवत: स्मरणाद् व्रजन्ति ||४४||
Ambhōnidhaukṣubhita-bhīṣaṇa-nakra-cakra-
Pāṭhīna-pīṭha-bhaya-dōlvaṇa – vāḍavāgnau |
Rangattarang-śikhara-sthita-yāna-pātrās-
Trāsaṁ vihāya bhavata: Smaraṇād vrajanti ||44||

All copyrights reserved © 2Alotus

उद्भूत-भीषण-जलोदर-भार-भुग्ना:,
शोच्यां दशामुपगताश्च्युत-जीविताशा: |
त्वत्पाद-पंकज-रजोऽमृत-दिग्ध-देहा,
मर्त्या भवन्ति मकरध्वज-तुल्यरूपा: ||४५||
Udbhūta-bhīṣaṇa-jalōdara-bhāra-bhugnā:,
Śōcyāṁ daśāmupagatāścyuta-jīvitāśā: |
Tvatpāda-paṅkaja-rajōm̐ṛta-digdha-dēhā,
Martya bhavanti makaradhvaja-tulyarūpā: ||45||

आपाद-कण्ठमुरु-श्रृंखल-वेष्टितांगा:,
गाढं वृहन्निगड-कोटि-निघृष्ट-जंघा: |
त्वन्नाम-मन्त्रमनिशं मनुजा: स्मरन्त:,
सद्य: स्वयं विगत-बन्ध-भया भवन्ति ||४६||
Āpāda-kaṇṭhamuru-śraṅkhala-vēṣṭitāṅgā:,
Gāḍhaṁ vr̥hannigaḍa-kōṭi-nighr̥ṣṭa-jaṅghā: |
Tvannāma-mantramaniśaṁ manujā: Smaranta:,
Sadya: Svayaṁ vigata-bandha-bhayā bhavanti ||46||

मत्तद्विपेन्द्र - मृगराज-दवानलाहि-
संग्राम-वारिधि-महोदर-बन्धनोत्थम् |
तस्याशु नाशमुपयाति भयं भियेव,
यस्तावकं स्तवमिमं मतिमान धी ते ||४७||
Mattadvipēndra - mr̥garāja - davānalāhi-
Saṅgrāma-vāridhi-mahōdara-bandhanōt'tham |
Tasyāśu nāśamupayāti bhayaṁ bhiyēva,
Yastāvakaṁ stavamimaṁ matimāna dhī tē ||47||

स्तोत्र-स्रजं तव जिनेन्द्र! गुणैर्निबद्धाम्,
भक्त्या मया रुचिर-वर्ण-विचित्र-पुष्पाम् |
धत्ते जनो य इह कण्ठ-गतामजस्रम्,
तं 'मानतुंग'मवशा समुपैति लक्ष्मी: ||४८||
Stōtra-srajaṁ tava jinēndra! Guṇairnibad'dhām,
Bhaktyā mayā rucira-varṇa-vicitra-puṣpām |
Dhattē janō ya iha kaṇṭha-gatāmajasram,
Taṁ 'mānatuṅga'mavaśā samupaiti lakṣmī: ||48||

All copyrights reserved © 2Alotus

।। इति श्रीमानतुङ्गाचार्य-विरचितं आदिनाथ-स्तोत्रं समाप्तम् ।।

|| Iti śrīmānatungācārya-viracitam ādinātha-stōtram samāptam ||

* * * A * * *

2Alotus

All copyrights reserved © 2Alotus